ह्यात्मनोऽणुत्वे विप्रतिषिध्येतेति चेत् नैष दोषः। कस्मात् इतराधिकारात्। परस्य ह्यात्मनः प्रक्रियायामेषा परिमाणान्तरश्रुतिः, परस्यैवात्मनः प्राधान्येन वेदान्तेषु वेदितव्यत्वेन प्रकृतत्वात्, “विरजः पर आकाशात्” इत्येवं विधानाच्च परस्यैवात्मनस्तत्र तत्र विशेषाधिकारात्। ननु “योऽयं विज्ञानमयः प्राणेष्विति” शारीरोमहत्त्वसम्बन्धित्वेन प्रतिनिर्द्दिश्यते। शास्त्रदृष्ट्या त्वयं निर्द्देशो वामदेववद्द्रष्टव्यः। तस्मात्प्राज्ञविषयत्वात्परिमाणान्तरश्रवणस्य, न जीवस्याणुत्वं विरुध्यते। “स्वशब्दोन्मानाभ्याञ्च” सू० इतश्चाणुरात्मा यतः साक्षादेवास्याणुत्ववाची शब्दः श्रूयते “स एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेशेति” प्राणसम्बन्धाच्च जीवएवायमणुरभिहितइति गम्यते तथाचोन्मानमपि जीवस्याणिमानं गमयति ‘बालाग्रशतभागस्य शतधा कल्पितस्य च। भागोजीवः स विज्ञेय” इति। ‘आराग्रमात्रोह्यवरोऽपि दृष्ट” इति चोन्मानान्तरम्। नन्वणुत्वे सत्येकदेशस्थस्य सकलदेहगतोपलब्धिर्विरुध्यते दृश्यते च जाह्नवीह्रदनिमग्नानां सर्व्वाङ्गे शैत्योपलब्धिर्निदाघसमये च सकलशरीरपरितापोपलब्धिरितिचेत् उत्तरं पठति। “अविरोधश्चन्दनवत्” सू०। यथा हि हरिचन्दनविन्दुः शरीरैकदेशे सम्बद्धोऽपि सन् सकलदेहव्यापिनमाह्लादं करोत्येवमात्मापि देहैकदेशस्थः सकलदेहव्यापिनीमुपलब्धिं करिष्यति। त्वक्सम्बन्धाच्चास्य सकलशरीरगता वेदना न विरुध्यते। त्वगात्मनोर्हि सम्बन्धः कृत्स्नायान्त्वचि वर्त्तते त्वक् च सर्व्वशरीरव्यापिनीति। “अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदि हि” सू०। अत्राह यदुक्तम् “अविरोधश्चन्दनवदिति” तदयुक्तं दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वात् सिद्धे ह्यात्मनोदेहैकदेशस्थत्वे चन्दनदृष्टान्तो भवति। प्रत्यक्षन्तु चन्दनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनञ्च। आत्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्यक्षं नैकदेशवर्त्तित्वम्। अनुमेयन्तदिति यदुच्येत न चात्रानुमानं सम्भवति। किमात्मनः सकलशरीरगता वेदना त्वगिन्द्रियस्येव सकलदेहव्यापिनः सतः किं विभोर्नभसइव, आहोस्विच्चन्दनविन्दोरिवाणोरेकदेशस्थस्येति संशयाऽनतिवृत्तेरिति। अत्रोच्यते–नायं दोषः। कस्मात् अभ्युपगमात्। अभ्युपगम्यतेऽह्यात्मनोऽपि चन्दनस्येव देहैकदेशवर्त्तित्वमवस्थितिवैशेष्यम्। कथमिति उच्यते। हृदि ह्येष आत्मा पठ्यते वेदान्तेषु ‘हृदि ह्येष आत्मा” “स वा एष आत्मा हृदि कतमः? आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष” इत्याद्युपदेशेभ्यः। तस्माद्दृष्टान्तदार्ष्टान्तिकयोरवैषम्याद्युक्तमेवैतदविरोधश्चन्दनवदिति। “गुणाद्वालोकवत्” सू०। चैतन्यगुणव्याप्तेर्वाणोरपि सतोजीवस्य सकलदेहव्यापि कार्य्यं न विरुध्यते। यथा लोके मणिप्रदीपप्रभृतीनामपवरकैकदेशवर्त्तिनामपि प्रभा अपवरकव्यापिनी सती कृत्स्नेऽपवरके कार्य्यं करोति तद्वत्। स्यात्कदाचिच्चन्दनस्य सावयवत्वात् सूक्ष्मावयवविसर्पणेनापि सकलदेहआह्लादयितृत्वं नत्वणोर्जीवस्यावयवाः सन्ति यैरयं सकलदेहं विसर्पेदित्याशङ्क्य “गुणाद्वालोकव”दित्युक्तम्। कथं पुनर्गुणो गुणिव्यतिरेकेणान्यत्र वर्त्तेत न हि पटस्य शुक्लोगुणः पटव्यतिरेकेणान्यत्र वर्त्तमानोदृश्यते। प्रदीपप्रभावद्भवेदिति चेन्न तस्या अपि द्रव्यत्वाभ्युपगमात्। निविडावयवं हि तेजोद्रव्यं प्रदीपः विरलावयवन्तु तेजोद्रव्यमेव प्रभेति अत उत्तरं पठति। “व्यतिरेके गन्धवत्” सू० यथा गुणस्यापि सतोगन्धस्य गन्धद्रव्यव्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कुसुमादिषु गन्धोपलब्धेः एवमणोरपि सतोजीवस्य चैतन्यगुणव्यतिरेकोभविष्यति। अतश्चानैकान्तिकमेतद्गुणत्वात् रूपवदाश्रयविश्लेषानुपपत्तिरिति गुणस्यैव सतोगन्धस्याश्रयविश्लेषदर्शनात्। गन्धस्यापि सहैवाश्रयेण विश्लेष इति चेन्न यस्मान्मूलद्रव्याद्विश्लेषस्तस्य क्षयप्रसङ्गात्। अक्षीयमाणमपि तत्पूर्व्वावस्थातोऽवगम्यते अन्यथा तत्पूर्व्वावस्थैर्गुरुत्वादिभिर्हीयते। स्यादेतत् गन्धाश्रयाणां विश्लिष्टानामल्पत्वात्सन्नपि विश्लेषो नोपलक्ष्यते सूक्ष्मा हि गन्धपरमाणवः सर्व्वतो विप्रसृतागन्धबुद्धिमुत्पादयन्ति नासिकापुटमनुप्रविशन्त इति चेन्न अतीन्द्रियत्वात् परमाणूनां स्फुटगन्धोपलब्धेश्च नागकेशरादिषु। न च लोके प्रतीतिर्गन्धवद्द्रव्यमाघ्रातमिति गन्धएवाघ्रात इति लौकिकाः प्रतियन्ति। रूपादिष्वाश्रयव्यतिरेकानुपलब्धेर्गन्धस्याप्ययुक्ताश्रयव्यतिरेक इति चेन्न प्रत्यक्षत्वादनुमानाप्रवृत्तेः। तस्माद्यद्यथा लोके दृष्टं तत्तथैवानुगन्तव्यं निरूपकैर्नान्यथा। न हि रसोगुणोजिह्वयोपलभ्यतइत्यतो रूपादयोऽपि गुणाजिह्वयैवोपलभ्येरन्निति नियन्तुं शक्यते। “तथा च दर्शयति” सू०। श्रुतिर्हृदयायतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय तत्रैव “आलोमभ्य आनखाग्रेभ्यः” इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति। “पृथगुपदेशात्” सू०। “प्रज्ञया शरीरं समारुह्येति” चात्मप्रज्ञयोः कर्त्तृकरणभावेन पृथगुपदेशाच्चैतन्येन गुणेनैवास्य शरीरव्यापितावगम्यते। “तदेषां प्राणानां विज्ञानेन विज्ञानमा-